१० चेतनीया ११ रथाङ्गी १२ मङ्गल्या १३ लोककान्ता १४ जीवश्रेष्ठा १५ यशस्या १६। अस्याः गुणाः। मधुरत्वम्। सुस्निग्धत्वम्। अतितिक्तत्वम्। शीतलत्वम्। रुचिमेधाकारित्वम्। श्लेष्मकुष्ठक्रमिनाशित्वञ्च। इति राजनिर्घण्टः॥ अस्या रूपं यथा,—
"ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोशयामले।
श्वेतलोमान्वितः कन्दो लताजालः सरन्ध्रकः॥
स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्ब्रुवे।
तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा॥
वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः"।
औषधकरणे ऋद्धिवृद्धिस्थाने वाराहीकन्दः अथवा बला देया। इति परिभाषा॥ * ॥ समृद्धिः। इति मेदिनी॥ (यथा, कुमारे २। ५८॥
"परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना"।)
पार्व्वती। इति शब्दरत्नावली॥ (लक्ष्मीः॥)

ऋध, उ य न इर वृद्धौ। इति कविकल्पद्रुमः॥ (दिवां, स्वां-परं-सकं-सेट्।) य ऋध्यति। उ अर्द्धित्वा ऋद्धा। न ऋध्नोति। इर आर्धत् आर्धीत्। क्वचित्तु नौ चायम्। सोऽहं प्राम्यवतेव भूतजगन्नीमृध्नोमीति भवभूतिः॥ अन्तर्भूतण्यर्थत्वादिदं सिद्धमिति केचित्। इति दुर्गादासः॥

ऋफ, श दाने। श्लाघायाम्। हिंसायाम्। निन्दायाम्। युद्धे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं,अकं च-सेट्।) श ऋफति जनो ददाति श्लाघते छिनत्ति निन्दति युध्यते वेत्यर्थः। आगमे। हिंसायामप्ययमित्यन्ये। इति दुर्गादासः॥

ऋभुः, पुं, (ऋ स्वर्गे देवमातुरदितेर्वा भवति यः। ऋ + भू + डु।) देवता। इत्यमरः॥ (यथा, ऋग्वेदे। ८। २१। ६।
"ऋभुर्न रथ्यं नवं दधता केतुमादिशे"।
देवानामपि देवः। यथा, महाभारते वनपर्व्वणि।
"ऋभवो नाम तत्रान्ये देवानामपि देवताः।
तेषां लोकाः परतरे यान्यजन्तीह देवताः"॥)
चाक्षुषमन्वन्तरे देवगणभेदः। यथा,—
"आद्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः"।
इति हरिवंशे। ७। ३२॥)

ऋभुक्षः, पुं, (ऋभवो देवाः क्षियन्ति वसन्ति यत्र। ऋभु + क्षि + ड।) स्वर्गः। वज्रम्। इन्द्रः। इति। रायमुकुटः॥ (देवमात्रे। यथा ऋग्वेदे। ४। ३०। १। "उपनो राजा अध्वरमृभुक्षाः"।
"ऋभुक्षाः ऋभवः"। इति भाष्यम्॥)

ऋभुक्षाः, [न्] पुं, (ऋभुक्षः स्वर्गः वज्रं वा अस्यास्तीति इनिः। "पथिमथ्यृभुक्षामात्"। ७।१।८५। "इतोत्सर्व्वनामस्थाने"। ७।१।८६। इत्यादिना सिद्धम्। यद्वा ऋच्छति इति अर्त्तेर्भुक्षिनक् प्रत्ययः।) इन्द्रः। इत्यमरः॥ (यथा, ऋग्वेदे। ७। ३७। ३। "इन्द्रो विभ्वां ऋभुक्षा वाजो अर्य्यः"। इति॥)

ऋम्फ, प श बधे। (मुचादि-तुदां-परं-सकं-सेट्।) इति रिम्फधातोर्टीकायां दुर्गादासः॥

ऋश, गतिस्तुत्योः। सौत्रधातुरयम्। (परं-सकं-सेट्।) ऋशः। इति दुर्गादासः॥

ऋश्यः, पुं स्त्री, (ऋश् + क्यप्।) मृगविशेषः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८। ४। १०।
"ऋश्यो न तृष्यन्नवपानमागहि"॥)

ऋष, ई श गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ऋस्वादिः। ई ऋष्टः। श ऋषति। इति दुर्गादासः॥

ऋषभः, पुं, (ऋष् + "ऋषिवृषिभ्यां कित्"। इति उणादिसूत्रेण ३।१२३। अभच्। किच्च।) वृषः। (यथा, ऋग्वेदे ६। २८। ८। "उप ऋषभस्य रेतस्युपेन्द्र तव वीर्य्ये"॥) कर्णरन्ध्रम्। कुम्भीरपुच्छः। उत्तरपदे श्रेष्ठः। इति मेदिनी॥
("स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः"॥
इत्यमरवाक्यात्। यथा पुरुषर्षभः पुरुषश्रेष्ठः इत्यर्थः। असमस्तेऽप्ययं श्रेष्ठार्थवाचकः। यथा, भागवते २। ४। २२॥
"स्वलक्षणा प्रादुरभूत् किलास्यतः
स मे ऋषीणामृषभः प्रसीदताम्"॥
"ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः"। इति तट्टीका॥ गणविशेषः। आकृतिगणोऽयम्। यथा पाणिनिः तत्पुरुषसमासप्रकरणे २। १। ५६॥
"उपमितं व्याघ्रादिभिः सामान्याप्रयोगे"॥ व्याघ्रादिराकृतिगणः। "व्याघ्र-सिंह-ऋक्ष-ऋषभ-चन्दन-वृक-वृष-वराह-हस्तिन्-तरु-कुञ्जर-रुरु-पृषत्-पुण्डरीक-पलाश-कितवाः"। इत्येते व्याघ्रादयः॥) पर्व्वतविशेषः। इति धरणी॥ वराहपुच्छः। आदिजिनः। इति हेमचन्द्रः॥ भगवदवतारविशेषः। (यथा, भागवते ५।६।७। "तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन सङ्क्रममाणः"।) स तु सत्ययुगे अग्नीध्रसुतनाभिराजपुत्त्रत्वेन जातः। तस्य पुत्त्रः जड़भरतः। इति श्रीभागवतं।
(तथा, मार्कण्डेये ५३। ३८।
"अग्नीध्रसूनोर्नाभेस्तु ऋषभोऽभूत् सुतो द्विज!।
ऋषभाद्भरतो जज्ञे वीरः पुत्त्रशताद्वरः"॥
स्वारोचिषे मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ६७। ४।
"उर्जस्तम्बस्तथा प्राणो दत्तोलिर्ऋषभस्तथा"॥
ऋषभसहस्रदक्षिण एकाहनिष्पाद्यो यागभेदः। यथाह गर्गः "पूर्व्वं ऋषभसंज्ञो राज्ञः"॥ स्वनामख्यातः यज्ञतुरपुत्त्रो नृपभेदः। यथा, शतपथब्राह्मणे १३। ५। ४। १५। "एकविंशस्तोमेन ऋषभो याज्ञतुर ईजे शिक्नानां राजा तदेतद्गाथयाऽभिगीतम्"॥) अष्टवर्गान्तर्गतौषधविशेषः। तत्पर्य्यायः। वृषः १ ऋषभकः २ वीरः ३। इति रत्नमाला॥ गोपतिः ४ धीरः ५ विषाणी ६ दुर्द्धरः ७ ककुद्मान् ८ पुङ्गवः ९ वोढ़ा १० शृङ्गी ११ धूर्य्यः १२ भूपतिः १३ कामी १४ रुक्षप्रियः १५ उक्षा १६ लाङ्गूली १७ गौः १८ बन्धुरः १९ गोरक्षः २० वनवासी २१। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। रक्तपित्तविरेकनाशित्वम्। शुक्रश्लेष्मकारित्वम्। दाहक्षयज्वरहरत्वञ्च। इति राजनिर्घण्टः॥ * ॥
("जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ।
रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ"॥
"ऋषभो वृषशृङ्गवत्"॥
"ऋषभो वृषभो धीरो विषाणी द्राक्ष इत्यपि"॥
अनयोर्गुणा यथा॥
"जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ।
मधुरौ पित्तदाहास्रकार्श्यवातक्षयापहौ"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सप्तस्वरान्तर्गतद्वितीयस्वरः। (अयं स्वरः त्रिश्रुतिः। अस्याः तिस्रः श्रुतयो यथा, (१) दयावती, (२) रञ्जनी, (३) रतिका। तिसृणां श्रुतिजातयो यथा, (१) करुणा, (२) मध्या, (३) मृदुः। अयञ्च ऋषिवंशीयः, क्षत्त्रियजातिः, पिञ्जरवर्णश्च। अस्योत्पत्तिः शाकद्वीपे। अस्य ऋषिः देवता च ब्रह्मा; छन्दो गायत्री। यथा सङ्गीतरत्नाकारे,—
"ऋषभस्त्रिश्रुतिस्ततः ... ...।
दयावती रञ्जनी च रतिका चर्षभे स्थिता॥
दीप्तायता मृदुर्मध्या षड्जे स्यात् ऋषभे पुनः।
संस्थिता करुणा मध्या मृदुः ... ...॥
पञ्चमः पितृवंशस्थो रि-धावृषिकुलोद्भवौ।
ऋधौ तु क्षत्त्रियौ ज्ञेयौ वैश्यजाती निगौ मतौ"॥
रि-धौ ऋषभधैवतौ इत्यर्थः। इत्यादि।)
स तु गोस्वरतुल्यस्वरः। चातकस्वरतुल्यस्वर इति केचित्। नारदमते गावः ऋषभस्वरं वदन्ति यथा,—
"षड्जं रौति मयूरो हि गावो नर्द्दन्ति चर्षभम्"।
इति नारदसंहितायाम्। दर्पणरत्नाकरादिमते तु चातकः ऋषभं वदति। यथा सङ्गीतदर्पणे,—
"स्वरमृषभं चातको ब्रूते"।) अस्योत्पत्तिः।
"नाभिमूलाद्यदा वायुरुत्थितः कुरुते ध्वनिम्।
वृषभस्येव निर्याति हेलया ऋषभः स्मृतः"॥
इति सङ्गीतदामोदरः॥
("नाभेः समुदितो वायुः कण्ठशीर्षसमाहतः।
ऋषभस्येव नादं यत् तस्मादृषभईरितः"॥
इति च सङ्गीतसमयसारे। अस्योत्पत्तिः ऋग्वेदात्। यथा रत्नावल्यां,—
"ऋग्वेदात् षड्ज-ऋषभौ यजुषो मध्यधैवतौ।
सामवेदात् समुद्भूतौ तथा गान्धारपञ्चमौ"।
इति॥)

ऋषभध्वजः, पुं, (ऋषभः ध्वजश्चिह्नमस्य ध्वजेऽस्य वा।) शिवः। अर्हद्विशेषः। इति मेदिनी॥

ऋषभी, स्त्री, (ऋषभ + जातौ ङीष्।) नराकारस्त्री। शूकशिम्बी। शिराला। विधवा। इति मेदिनी॥
(शूकशिम्ब्यर्थे व्यवहारो यथा॥
"ऐन्द्र्यृषभ्यतिरसेत्यादिषु"।
इति चरके सूत्रे चतुर्थेऽध्याये। अत्र हि ऋषभी शूकशिम्बी इत्यस्य शिवदासीयटीका॥ * ॥)

ऋषिः, पुं, (ऋषति प्राप्नोति सर्व्वान् मन्त्रान् ज्ञानेन पश्यति संसारपारं वा इति। ऋष् + "इगुपधात् कित्" ४।११९। इति उणादिसूत्रेण इन्। किच्च।) ज्ञानसंसारयोः पारगन्ता। शास्त्रकृदाचार्य्यः। (यथा, ऋग्वेदे १। १। २। "अग्निः